२८८२

बृहज्जातक विवृतिः

जगच्चन्द्रिका

बृजा
टी
१

ॐ स्वस्तिश्रीगणेशायनमः ब्रह्माजशंकररवीन्दुकुजज्ञजीवशुक्रार्कपुत्रगणनाथ
गुरून्प्रणम्य यःसंग्रहोर्कवरलाभविवृद्धबुद्धेरावंतकस्यतमहंविवृणोमिकृत्स्नं य
च्छास्त्रंसविताचकारविपुलैःस्कंधैस्त्रिभिर्ज्योतिषां तस्योच्छित्तिभयात्पुनःकलियु
गेसंसृत्ययोभूतले भूयःस्वल्पतरंवराहमिहिरव्याजेनसर्वंव्यधादित्थंयंप्रवदं
तिमोक्षकुशलास्तस्मैनमोभास्वते वराहमिहिराद्धोस्वबृहद्भेदेनायाकेलग्रह
र्गणयादसिप्रभवयोगनेत्राज्जले भ्रमंतिपरिवीतायनेलघुधियोर्थलब्धास्त
तःकरोमिविवृतिंस्ववाग्जिनधियाहमत्रामलः इहशास्त्रकानिसंबन्धप्रयोज
नाभिधेयानिभवंतीत्युच्यते वाच्यवाचकलक्षणःसंबंधःवाच्योर्थः वाचकःशा
स्त्रंग्रंथोवापायोपयलक्षणःसंबंधःउपायस्त्विदंशास्त्रं उपेयंज्ञानं अथवाब्रा
ब्रह्मादिविस्तरमिदंवेदांगमितिसंबन्धः लग्नहोराद्रेष्काणनवांशकद्वाद
शभागत्रिंशांशग्रहकेन्द्रबलिकायोगादिज्ञानमभिधेयं तज्ज्ञानाद्यियास्वतां
शुभाशुभफलकथनमितिप्रयोजनं सत्पात्रयात्राहोमादिहलोकपरलोक
सिद्धिरितिप्रयोजनप्रयोजनंकिमभिरुकैरि[illegible] ज्योतिषांसंबन्धाभि १

धेयप्रयोजनकथनाच्छास्त्रविषये प्रवृत्तिर्जायते इति तथा चोक्तमत्रार्थे सिद्धिः श्रोतृप्रवृ
त्तीनां संबंधकथनाद्यतः तस्मात्सर्वेषु शास्त्रेषु संबन्धः पूर्वमुच्यते किमेवात्राभिधे।
यं स्यादिति पृष्टस्तु केनचित् यदि न प्रोच्यते तस्य फलं सम्यक् तन्न भवेत् सर्वस्यैव हि शा
स्त्रस्य कर्मणो वापि कस्यचित् यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यते कस्माच्छा।
स्त्राधिकारः उच्यते हि जन्मसेवा तत्त्वेन षडङ्गो वेदोऽध्येतव्य आस्तां न यत्र कान्यङ्गानी
उच्यन्ते शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः छन्दसां लक्षणं चैव षडङ्गो
वेद उच्यते इति समानयनाचार्यः यच्छास्त्रसारं मे ह्यभिमतं देवताप्रसादात्तन्नमस्का
रेण तस्मात्सावात्तद्धर्मविशेषणो वाभिप्रेतार्थसिद्धिं वाञ्छतीति तदयमप्यावन्तका।
चार्यो वराहमिहिरो मागधद्विजोऽर्कवरलब्धप्रसादो ज्योतिःशास्त्रसंग्रहकरणे
तच्छुद्धानाचतुर्थे हानात्स्कारं चिकीर्षुरशेषविघ्नोपशान्तये भगवतः सूर्यादात्मगा
मिनो वा किलादिशार्हलाविचक्षीणि तनारु सर्वानित्यपरिकल्पितः शशिभ्रष्टताविवन्ना।
प्रत्नजन्मनामात्मनामविदांकृतनुष्यज्जनो भर्तारमो निधि लोकानां प्रलया
द्वस्थितिविभवस्थानेकधायः ज्ञो वाचनः सदस्तनेक किरणास्त्रैलोक्यदीपो

सूर्या
टी
२

2

विः सर्वविभगवानादित्यः नः अस्माभ्यं गिरं वाचं प्रयच्छतु दद्यात् । कीदृशो रविः अनेककि
रणः अनेके किरणा यस्य सः सावनेककिरणः सहस्ररश्मिरित्यर्थः त्रैलोक्यदीपः प्रका
शकत्वधर्मात् तथा मूर्तितेन परिकल्पितः शशाच्चन्द्रमण्डलं विभर्ति धारयतीति शशभृ
च्छशांककलस्य मूर्तिविशेषत्वेन परिकल्पितः पर्यवस्थापितः यतो जलमयश्चन्द्रः प्रका
शस्वरूपस्तस्मिंस्तद्गभस्तिकिरणप्रतिफलनाद्दिनिरस्य सोऽन्धा प्रकाशविसर्पत्तस्माद्युक्तं
सलिलमये शशिनि रवेर्दीधितयो मूर्छितास्तमो नैशं तथा तेन दर्पणोदरनिहिता
इव मंदिरस्यान्तरिति तथा च वेदे सुषुम्णः सूर्यरश्मिश्चन्द्रमा इति अथवा शशिभृ
तो पर्वः पाठः शशिभृतो महादेवस्य मूर्तित्वेन परिकल्पितः यतो सो भगवान् अष्टमूर्तिः
व्योमेन्दुवह्निमरुदर्कमहीजलाख्या अष्टौ मूर्तयो यस्य महादेवस्येश्वरीमूर्तिः सूर्यश्रे
ष्ठः तथा वर्त्माऽपुनर्जन्मनां न विद्यते पुनर्जन्म येषां ते अपुनर्जन्मानो मुक्ताः ते
षां वर्त्म मार्गः मोक्षद्वारमित्यर्थः यतो द्विविधो मार्गो देवयानाख्यः पितृयानाख्य
श्च तत्र पितृयानमार्गद्वारभूतश्चन्द्रमाः देवयानगामिनः स्वर्गं गच्छन्ति मोक्षद्वा
रं सूर्यः यतः सूर्यमण्डलं भित्त्वा मोक्षभाजो गच्छन्ति तथा च भगवान्व्यासः स्वर्गद्वा

देवज्ञाह्वारंमोतह्वारेत्रिविश्वमिति आत्मेत्यात्मविश्वं आत्मानं विशंतो मात्मविशेषयोऽपि
नः तेषामात्माविष्णुः तेनोद्रूपोऽहं दयांतवस्थितः तथा श्रुतिः सूर्य आत्मा जगतस्तस्थु
षश्च जगतोऽतंगमस्यतस्थुषः स्थावरस्य कृतघ्यजतो यजतो यजमानानां कृतः स
एवयथोक्तं अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टे
रन्नं ततः प्रजाऽइति भर्ता सर्वभूतानि येषां अमरादेवाः ज्योतींषि ग्रहनक्षत्रादीनि तेषां
भर्ता प्रभुः प्रधानमित्यर्थः यतस्सर्वएव देवास्तस्याऽवस्थानेकत्वेन ग्रहनक्षत्राणां
चतद्रूपेण स्थितस्तदयास्तमयाः यत उक्तं तेजसां पालकः सूर्यो ग्रहरूपाणि भूगोल
कोः प्रभावतोहि दृश्यन्ते सूर्यरश्मिविशेषिता इति लोकानां प्रलयोद्भवस्थितिनिवि
भुः लोकाभूर्लोकादयस्तेषां प्रलयविनाशश्च उद्भवउत्पत्तिः स्थितिनिविभुः लोका
भूर्लोकादयस्तेषां प्रलयोत्पालने प्रभविष्णुना भगवतः अतीतवर्तमानभावि
कालत्रयपरिच्छेदविजृम्भितत्वात् वशाद्वाऽवधारणा अनेकधायः प्रकृतो वेदयोने
कधानेकप्रकारः प्रसूते तथाचोक्तं इंद्रं मित्रं वरुणमग्निमाहुरथो दिव्यास्सुप
र्णोगरुत्मान् एकं सद्विप्रा बहुधा वदंत्यग्निं यमं मातरिश्वानमाहुरित्यादिना १

वृ.जा.
टी.
३

प्रभुनास्वशास्त्रस्यपरप्रणीतत्वादानर्थक्यंपरिजिहीर्षुरस्मच्छास्त्रेप्यस्यस्वशास्त्रस्यगुण
वत्वंप्रदर्शयन्शास्त्रफलंविक्रीडितेनाह। मुख्याभिःपटुबुद्धिभिःपटुधियांहोराफलज्ञप्तये
शब्दन्यायसमन्वितेषुबहुशःशास्त्रेषुदृष्टेष्वपि। होरातंत्रमहार्णवप्रतरणेभग्नोद्य
मानामहंस्वल्पंवृत्तविचित्रमर्थबहुलंशास्त्रप्लवंप्रारभे॥ होरायास्तंत्रंहोरातंत्रं अथ
वाहोरैवतंत्रंतदेवमहार्णवःदुष्पारत्वात्तनन्तेविस्तार्यतेयेनार्थस्तत्तंत्रं तस्यतर
णंप्रतरणंविषयेभग्नोद्यमानामवसन्नोत्साहानांशास्त्रप्लवंप्रारभेकरोमि शास्त्र
मेवप्लवःशास्त्रप्लवःयथाप्लवस्तितीर्षूणांपारगमनमाशुसंपादयति तथेद
मपि होरातंत्रप्रतरणोद्यतानामित्यस्माप्लवेनसाधर्म्यंकेनकृतेहोरातंत्रमहार्ण
वप्रतरणेभग्नोद्यमानामित्यत्राह मुख्याभिरिति मुख्याभिर्बहुतरैःकिंभूतैःपटुबु
द्धिभिश्चतुरप्रज्ञैःपटुधीयामगल्भबुद्धीनांपटुबुद्धयः नैःशास्त्रेषुदृष्टेष्वपिविरचि
तेष्वपितस्मात्किंभूतेषुशब्दन्यायसमन्वितेषुशब्दानांन्यायःशब्दन्यायः मीमांसा
तदुक्तं शब्दानामेवसाधुत्वनिरूपणायःवृत्तिसम्यगिति अथवाशब्दश्चन्यायश्च
शब्दन्यायाःशब्दार्थवानन्यायोमीमांसातैःसमन्वितेषुयुक्तेषु किंभूतं

३

ध्येभुनेत्याह बहुशः बहुवारान्बहुशः आसमसमासैर्बहुप्रकारैर्विचितेष्वित्यर्थः कि
मर्थं हव्येषु पटुधियां होराफलतमये वत्सबुद्धीनां होराफलार्थावबोधाय
होरायाः फलं होराफलं शाकुनं कर्मविपाको हेमानं फलं स्नुभाशुभं तस्य प्रागमया।
तज्ज्ञानाय किंभूतं शास्त्रं स्वल्पं स्वल्पलघुग्रन्थं वृत्तैर्विचित्रमर्थं वृत्तैः शार्दूलविक्रीडि
तप्रमुखैर्विविचित्रैः स्य तस्मात्स्वल्पेनैवास्य गुणावत यतस्तेषामध्यापुष्पसमभिधानम
वति स्वल्पमित्यनेन ग्रहणधारणासुखत्वं प्रदर्शयति तथा च वीरसेनः समासोक
त्पशास्त्रस्य सुखं ग्रहणधारणेति वृत्तैर्विचित्रमित्यनेन श्रव्यतां प्रदर्शयति गुरु
स्वल्पशास्त्रस्य स्वल्पार्थेनैवं भविष्यतीत्याह अर्थबहुलं बह्वभिधेयं सूनएवस्वा।
विविचितशास्त्रेभ्यः संगोत्तं ग्रन्थादितच्छास्त्रसंभवात्तेन कृतेनादोषः स्यात्
एतदुक्तं भवति ग्रन्थाभिहितशास्त्राण्यतिविस्तरत्वान्नाभिमतघमानानां सहस्रशा।
स्त्रसंवत्सरे नतु कदाचित्स्वल्पप्रज्ञानां तथा तेनाभ्यस्यमानानि कृतोल्पं ग्रन्थं यथास्वे
शास्त्राणां बहुत्वाद्भ्रस्यमाः श्रुतेस्तेभ्यो ग्रह्यमाणमल्पमित्यत इदमाह
पटुधियामित्यनेनैतत्प्रतिपादितं भवति नहितेबुद्धिहीनत्वात्तेषु शास्त्रेषु भेदा

बृजा
टी
८

घमाः किं न दृश्यन्ते योषास्त्र्यथा चापि तेषां न्यग्यमभंगः स्यान्न लवमपि सत्वं हृतं विचित्र
मर्थबहुलं सत्वावहं भवति सत्वं बहुत्वं च विचित्रं वार्थबहुलं च स्वल्पं लघु हृतं पवित्र
त्वं ले विचित्रं मनोहरं अर्थबहुलमभिधानादिनं एवंविधं तितीर्षणामपि सत्वावहं
भवतीति अधुना होराशास्त्रस्य शास्त्रकृतकर्मविपाकव्यंजकत्वं वर्णयन् होरा
शब्दनिष्पत्तिं प्रदर्शयन्निन्दुवज्रयाह होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वा
परवर्णलोपात् कर्मार्जितं पूर्वभवे सदादि यत्तस्य पंक्तिं समभिव्यनक्ति होराशब्दशा
स्त्रे होरानाम अहोरात्रविकल्पमेके वाञ्छन्ति अहश्च रात्रिश्चाहोरात्रशब्देनोच्यते न
स विकल्पो विकल्पना एके अन्ये होरां वाञ्छन्ति इच्छन्तीत्यर्थः कथमुच्यते पूर्वा
परवर्णलोपात् अहोरात्रशब्दस्य पूर्ववर्णः अकारः अपरश्च त्रकारः तयोर्लो
पमदर्शनेन कृता होराशब्दो विशिष्यते किमर्थं पुनरयं होरात्रशब्दाद्धोराशा
स्त्रमुत्पाद्यतेऽभ्यस्यते मषाट्यो होराशब्दालना अहोरात्रात् अतः लग्नस्यका
लवशात्तात्तेन लग्नवशाच्छुभाशुभज्ञानं अतो होरात्राश्रयत्वात् एव होराशा
स्त्रमुत्पाद्यते एतदेवाचार्यस्याभिप्रेतं यतः परमतमप्रतिषिद्धमनुमतमिति ८

तथा च साराबल्यां । आद्यंतवर्णलोपाद्धोरास्माकं भवत्यहोरात्रं । तत्प्रतिबद्धाः सर्वे ग्रहभ
गणास्थितास्ते यस्मात् इति किमस्य प्रयोजनमित्यत आह । कर्मार्जितं पूर्वभवे सदादि ।
यत्तस्य पक्तिं समभिव्यनक्ति एवं भवे प्राग्जन्मनि यत्सदादि शुभाशुभं विमिश्रं च कर्मा
र्जितं तस्य पक्तिं पाकं समभिव्यनक्ति सम्यग्व्यनक्ति प्रकटीकरोति । तथा च लघुजा
तके यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः फलप्राप्तिं व्यञ्जयति शास्त्रमे
तत्तमसि द्रव्याणि दीप इवेति तत्र शुभस्याशुभस्य वा विशेषं भाविनः किं व्यञ्जकाः उच्य
ते द्विविधं शुभाशुभं दृष्टकर्मोपार्जितमदृष्टकर्मोपार्जितं च तत्र दृष्टकर्मोपार्जि
तस्य दशाफलपाकक्रमेण व्यक्तिः शुभं दशाफलेन ज्ञात्वा । यात्रादि परिहारः कर्त
व्यः शुभं ज्ञात्वा यात्रादेरतिशयेनादानं अदृष्टकर्मार्जितस्याष्टकवर्गेण फलव्यक्तिः
तथा अशुभं ज्ञात्वा शान्त्यादिभिरुपशमनं येन तथा च यवनेश्वरः यद्यद्विधानं नियतं
प्रजानां ग्रहस्थितेर्योगप्रभवं प्रसूतौ । भाग्यान्यतीतान्यभिशाहृदयंति वा तानि योगा
न्निदेशान्नराणां तदप्यभिन्नं विविधं निरुक्तं स्थिरात्मको नास्ति कसंस्थितं च का
लक्रमाज्ञानकनिश्चितेन यत्कर्मोपभोग्यं स्थिरमन्यथा तेन तत् समग्रहाणां प्रथितं ॥

बृ.जा.
टी.
५

नियानिस्यानानिजन्मप्रभवानिमद्भिः तेभ्यः फलंचावश्यकमस्मादयुक्तदामैत्रिकमे
त्रितंस्मात् अनेनास्थिरस्पर्शात्मादिभिरुपशमः प्रदर्शितोभवति तथाचभगवान्व्यासः
हस्तेनेडुवलंलेदेवंउरूपेणाविमश्रितेति २ अधुनाव्यवहारार्थकालात्यस्वरूपमसमे
षादिराशिसदवैकशिवः प्रभृत्यंगविभागशाहेलविक्रीडितेनाह कालांगानिवराग
माननमशेहत्क्रोडवासोभ्टनोवस्तिव्यंजनमरूजानुयुगलंजंघे ततोंघ्रिद्वयं मेषा
श्विप्रथमानवत्तचरणाम्यक्रस्थितानाराशयोराशितेत्रयुहतंभानिभवनेवैकार्थ
मप्रत्यये कालस्यांगानिकालांगानि तानिचमेषप्रथमराशयोनवर्तचरणाः
नवभिर्नवभिर्ऋक्षचरणैः नक्षत्रपादैः प्रमाणानोमेषाद्विप्रथमाः अश्विनीप्रभृ।
तिनवनवनक्षत्रपादाएकैकस्यप्रमाणं तथाभ्टनाराशयः भातुःकालस्याव
यवाः तथाचयवनेश्वरः ढढमपादेभवनंसमंतभेश्वति तथाचभगवान्गार्गिः अ
श्विनीभरणीमेषः कृत्तिकापादमेवच तस्मादेत्रिनयंकेशवृषः सोम्यदलंतथा सौ
म्यार्धमार्द्राभिथुनस्त्रिदिनेश्वराणात्रयं तस्माद्उष्यमश्लेषाराशिःकर्कटकः स्मृतः
पितृतस्त्रिदिनेश्वरमचंवं मंत्र्यंभागंतथार्यमाः पादःसिंहः प्रकीर्तितः तस्मादत्रित ५

यंकुंभाद्धस्तद्विराधमेवच तुलाविधानादलं सोनिर्विशाणावाचवाणात्रयं तस्मादंमिवेदे
वृंसमेषाद्वृश्चिकउच्यते मूलमाग्र्यतुधाथन्वीपादोविष्णुश्रवसच तस्मात्त्रयमश्व
न्यमकरोवाममवारले मूलवकणाःकुंभस्तुधानाश्रवणात्त्रयं तस्मादेकोमीनः।
स्यादेतिरिक्तभम्पूर्वनोइति चक्रस्थिताः चक्रस्थिताःप्रथवावक्रवास्थिताश्च स्थिताः
श्चेनेनसम्यानमेपादःप्रदर्शितंभवति तत्रकालात्मसंज्ञाशिरोमेषः आननंवृ
षवनहृषःउरोवतोमिथुनःहृतहृदयंककर्कटः क्रोडमुदरंसिंहः वासोभ्रततकटिः
कन्यावस्तिनाभिश्चधजांगुरंतरंतन तुलाध्वजनंयेनगुह्यंस्थज्यतेलिंग्यतेइति
तद्वृश्चिकःऊरूयुगलंधन्वी जानुयुगलंमकरः जंघेकुंभः श्चिद्वयंपादयुग
लंमीनइति तथाचवाचरायणाः मेषःशिरोथवदनंवृषभोविधात्रुवंतोमवक्ष
मिथुनंहृदयंकुलीरः सिंहस्तथोदरमथोयुवतिकटिश्चवस्ति तुलाभ्रदथोमर
नमष्टमःस्यात् धन्वीचास्योरुयुगंमकरोजानुद्वयंभवतिथाजुःलंचाहितयंकुंभः
पादौमत्स्यद्वयंचेति प्रयोजनंजन्मकालेयोराशिःपापग्रहान्तःसकालपुरुषा
स्ययस्मिन्नंगेस्थितस्तत्रांगेजातस्योपघातोवक्तव्योवाच्यः यत्रसौम्यस्तत्रपुष्टि

बृ.जा.
टी.
६

6

इति यथा च सांवत्सरं कालेन वर्षावयवानां रूपाणां कल्प्यते एवमेव काले सदसद्
दृष्टेषु योगात्स्पष्टान्येतानि पर्यायाणीति राशिक्षेत्रगृहर्क्षाणि एषां च प्रत्येकस्य राशिरिति सं
ज्ञा तस्य च पर्यायनामानि नामानि क्षेत्रं गृहं ऋक्षं भं राशिश्च क्षेत्रं च गृहं च ऋक्षं च भं च
तानि राशिक्षेत्रगृहर्क्षभानि भवनं च गृहनाम्ना भवनं ग्रहणेऽपि सिद्धे पुनर्भवनग्रह
णं कृतं ग्रहपर्यायाणां ग्रहणार्थं अन्यत्रापि ग्रहणं सिद्धं यत्पुनर्भग्रहणं तेनैत
द्दर्शयति यत्र यत्र होरा शास्त्रे अन्यत्र ग्रहणं भग्रहणं वा तत्र तत्र राशेरेव ग्रहणं स्यात्
न तु नक्षत्रस्य एते राशिपर्यायाः शब्दाः एकार्थसंप्रत्यये एकार्थत्वाद् एकार्थाभिधायका
इत्यर्थः ॥४॥ अधुना राशीनां स्वरूपं तावदेव सन्दर्शयन्नाह मत्स्यौ घटी नृमिथुनं स
गदं सवीणं चापी नरोऽश्वजघनो मकरो मृगास्यः तौली ससस्यदहना प्लवगा च क
न्या शेषाः स्वनामसदृशाः स्वचराश्च सर्वे मीनो राशिर्मत्स्यौ मत्स्यद्वयं मत्स्यपुच्छा
भिमुखं एतत्कृतो लभ्यते उच्यते तस्य वा भयोदयनात् वदति च लग्ने समेतस्य
यतः एकमेव मत्स्ययुग्ममिति घटी कुम्भः कन्यामस्तके स्थितघटः पुरुषः कुम्भः मिथुनो
नृमिथुनं स्त्रीपुंसौ तन्मिथुनं सगदं सवीणं पुमान् सगदः स्त्री सवीणा चापी नरोऽश्वजघ

६

युनः धन्वीराशिः चापीविद्यमानधन्वा नरोर्धजघनः धन्वीराशिः चापीविद्यमानधन्वा
नरोर्धजघनः अश्वजघनोजघनंयस्यासावश्वजघनः अश्वरूपधारित्यर्थः मकरोराशिर्म
करएवसचमृगास्योमृगाननः नौलीमाह नौलीविद्यमानवलः पुरुषः कन्याकु
मारी सवर्णानौगतासस्यदहना सस्यवद्दहनञ्चसस्यदहनौ नौ विधेनयस्याः सा सस
स्यदहना शेषाः स्वनामसदृशाः शेषाराशयः मेषवृषकर्कटवृश्चिकसिंहाः स्वना
मसदृशाः स्वसंज्ञावदिन्याकृतयः तद्यथा मेषोमेषएव वृषोवृषएव कर्कटः कु
लीरोजलचरःप्राणी सिंहःकेसरी वृश्चिकोवृश्चिकएवकीटजातिः तथाचमतःक
रोवृषभोवीणगदाधरंमिथुनंसमसिकुलीरः सिंहःशैलेकन्यानौमध्यादीपस
स्यकरा पुरुषस्तुलाधरोवृश्चिकोयधन्वोनरोर्धयान्मार्धः मकरार्धमृगादूर्ध्वंकुंभी
पुरुषोकघोत्मजलेशन्ति खचराश्चसर्वे सर्वेद्वादशराशयः खचराश्च खेषुखेषुस्था
नेषुचरंति यथाहद्दूस्थाननिवासिनइत्यर्थः तद्यथामेषवृषावावारोपादिवात
रौमिथुनंग्राम्यंकर्कटोवुचरः सिंहस्त्वारण्यः कन्याद्वीपिनेदशाविभागात्तुलग्रा
पणवीथ्यस्थः वृश्चिकःश्वभ्रचारीधन्वीग्राम्यः मकरःपूर्वभागस्त्वारण्यः अन्येजल

बृ.जा.
टी.
६

चरः कूर्मो ग्राम्यः मीनो जलचर इति तथा च यवनेश्वरः आद्यः स्मृतो मेषसमानराशिः कालस्य
मूर्धा गदितः पुराणैः अजाविकामं चरकंदरादिस्तेनाग्निधात्वाकरवनभूमिः वृषाकृतिस्तु
प्रथितो द्वितीयस्तवक्त्रकंठायतनं विधातुः वनादिसानुद्विपगोकुलानां कृषीवलानाम
धिवासभूमिः वीणागदाभृन्मिथुनं तृतीयः प्रजापतेः स्कन्धभुजांसदेशः प्रनर्त्तकोद्गा
यकशिल्पकस्त्रीक्रीडारतद्यूतविहारभूमिः कुलीरकाकृतिरम्बुसंस्थो वक्षःप्रदेश
विहितस्तु तुर्यः केदारवापीपुलिनानितम्बस्य वेदानगनानां रहस्यविविक्तभूमिः सिंहस्तु शैलेन्द्र
दयप्रदेशं प्रजापतेः पंचममाहुराद्याः तस्याटवीदुर्गगुहावनाद्रिव्याधावनीभूर्भवन
प्रदेशः प्रदीपिकाहस्तकं नौगता कन्या नौस्था जलेषष्ठमिति ब्रुवंति कालाथ धीराजघ
नंक्षितः सनहलास्त्रीरतिशालिभूमिः वीथ्यां तुलापाणिपरो मनुष्यः स्थितः सनाभीक
टिवस्तिदेशाः शुक्राधिवीथ्यापणपट्टनाधिमाथ्योधिवासस्तत्र तु सस्यभूमिः शुभ्रेष्ट
माद्दिश्चिकं विग्रहकृत्प्रोक्तः प्रभो मेढ्रगुदप्रदेशाः गुहाविलाश्मविषाश्मगुप्तिवा
ल्मीककीटाजगरादिभूमिः धन्वी मनुष्योऽश्वजघनं पश्चिमार्धस्तु माहुरूरू नवमं धनं प्रोक्तो
नः समस्थितयत्र समस्तवाजिस्त्राजन्मजरथाधभूमिः मृगार्धपूर्वो मक

दें वृषो गोवाजाद्वयोर्देशास्वशांतिथानः नदीधवाप्यमरोद्यानस्थमवभ्रस्नवासोदशा
मः पृथिव्यां स्कंधेनिलिकः वृरूपमसकंभोजेयनमेकादशमादृराद्यः नस्त्रोदका
धानकलसस्थपत्रितस्त्रीशूद्रांडिकस्यतनिवेशदेशाः जलेतुमीनद्वयमस्यराशिः का
लस्यपादोदिविदिनोविशिष्टः सवाप्यतीर्थाद्विजदेवभूमिनदीसमुद्रोवुधराधिवासः
प्रयोजनंनेह तनच्छादिस्थूद्वयस्यानस्थानं उक्तंच राशिभ्यःकालनिर्देशादिति ५ अथ
नाद्राशिनवांशकद्वादशभागाधिपानाह क्षितिजसितज्ञचंद्ररविसौ
म्यसितावनिजाः सुरगुरुमंदसौरगुरवश्च गृहांशकपाः अजमृगतौलिचंद्रभ
वनादिनवांशविधिर्भवनसमांशकाधिपतयः स्वगृहात्क्रमशः क्षितिजाद्यो
गृहपाः अंशकपश्च क्षितिजो भौमः मेषस्याधिपतिः सितः शुक्रो वृषस्य ज्ञो बु
धो मिथुनस्य चंद्रः कर्कटस्य रविः सिंहस्य सौम्यो बुधः कन्यायाः सितः शुक्र
स्तुलस्य अवनिजो भौमो वृश्चिकस्य सुरगुरुर्बृहस्पतिः धन्विनः मंदः शनैश्च
रो मकरस्य सौरः शनैश्चरः कुंभस्य गुरुर्बृहस्पतिर्मीनस्येति एवं नवांश
काधिपतयः नकेवलं मेषस्य भौमोधिपतिः यावदस्मिन्नपि मेषनवां

बृजा
टी
८

8

शकोदयो भवति तस्याधिपो भौमाधिपतिः शेषाणामप्येवमेव तेच नवांशकाः कथं भवं
तीत्याह अजमृगतौलिचंद्रभवनादि नवांशकविधिरिति आदिः प्रत्येकमभिसंबा
ध्यते तत्रैवं सति संबंधो जायते अजादि मृगादि तुलादि चंद्रभवनादि नवांशकवि
धिः सर्वराशीनां संभवति तत्राजादि नवांशकविधिर्मेषस्य तेन मेषवृषमि
थुनकर्कटसिंहकन्यातुलावृश्चिकधनुर्धराणां संबंधिनो नवांशा मेषस्य भवंति मृ
गादिर्वृषस्य तेन मकरकुंभमीनमेषवृषमिथुनकर्कटसिंहकन्यानां नवांशा।
वृषस्य तुलादिर्मिथुनस्य तेन तुलावृश्चिकधन्विमकरकुंभमीनमेषवृषमिथुना
नां नवांशास्तुलस्य कर्कटादिः कर्कटस्य तेन कर्कटसिंहकन्यातुलावृश्चिकध।
न्विमकरकुंभमीनानां संबंधिनो नवांशाः कर्कटस्य एवं सिंहस्य मेषवत् कन्या
याः वृषवत् तुलस्य मिथुनवत् वृश्चिकस्य कर्कटवत् पुनरपि धन्विनो मेषव।
त् मकरस्य वृषवत् कुंभस्य मिथुनवत् मीनस्य कर्कटवत् भवनसमांशकाधि
पतयः स्वगृहात् क्रमशः भवनसमांशेप्यंशकाः भवनसमांशकाः भवनानि द्वा
दश तत्समा अंशका द्वादशांशा इत्यर्थः तेच प्रत्येकस्य स्वगृहादारभ्य तद्यथा। ८

मेषस्य मेषवृषमिथुनकर्कटसिंहकन्यातुलवृश्चिकधनुर्मकरकुंभमीनानां संबंधि
नो द्वादशभागा भवंति मेषाद्याधिपतय एवाधिपतयः एवं वृषाद्या मेषान्ता वृषस्य।
मिथुनस्य मिथुनाद्या वृषान्ताः धनुषो धन्वाद्या वृश्चिकान्ताः मकरस्य मकराद्या धन्व
न्ताः कुंभस्य कुंभाद्या मकरान्ताः मीनस्य मीनाद्याः कुंभान्ता इति ६ अधुना त्रिंशांश
काधिपतीन्सुष्ठिनाय याह कुजरविजगुरुज्ञशुक्रभागाः पवनसमीरणकौर्पि
कलेयाः अयुजिषु जिवने विपर्ययस्थाः शशिभवनालिझषान्तमृक्षसंधिः कुजो
भौमः रविजः सौरः गुरुर्जीवः ज्ञो बुधः शुक्रो भार्गवः एषां क्रमेण पवनादयो भागाः
तद्यथा पवनाख्यावयवः पंच पंच भागाः कुजस्य अत ऊर्ध्वं समीरणाः पंच रविजस्य
एवं दश अत ऊर्ध्वं कौर्पिसंज्ञा अष्टौ गुरोः कौर्प्यो वृश्चिकः स च गणनयाष्टमः ए
वमष्टादश अतः परं जूकसंज्ञाः सप्त भागा बुधस्य जूकसंज्ञा तुलस्य स च गणना।
या सप्तमः एवं पंचविंशतिः अत ऊर्ध्वं लेयसंज्ञाः पंच शुक्रस्य लेयसंज्ञा सिंहः स
च गणनया पंचमः एवं त्रिंशत् किं सामान्येनेत्याह अयुजीति अयुजि विष
मराशौ कुजादयो यथा पवनादीनां भागानां क्रमेणाधिपतयः तत्र मे।

बृ.जा.
टी.
२

9

तत्रमेषमिथुनसिंहतुलधनुःकुंभाविषमराशयः कुजेनतमेविपर्ययस्थाःकुजेसमराशौतत्प
वभागाः ग्रहाश्चविपर्ययस्थास्वमध्येनतिष्ठंति तद्यथाप्रथमपंचभागाःकुजस्य अतःपंचसमबु
धस्य एवंद्वादश अतःपरमष्टौगुरोःएवंविंशतिः अतःपरंपंचशनेः एवंपंचविंशतिः ततः।
परंपंचशुक्रस्य एवंत्रिंशत् तत्रवृषकर्कटकन्यावृश्चिकमकरमीनास्समराशयः एवंत्रिंश।
द्भागाधिपतयः पंचताराग्रहाः तत्रकेचिदाहुः यथाविपर्ययस्थास्समेनेनानंतराणामेवप
वनादिसंख्यानांभागानांविपर्ययेनभवितव्यमव्यवहितानांकुजादीनांनेत्वाचुकं यस्मात्
श्लोकेत्रपठ्यते सवकुजादिस्वमस्थयार्थः तथाचश्रुतकीर्तिः पंचाद्यपंचचत्वाष्टौसमचपं
चैवचोजभवनेषुपरांशास्तुतसौरसुरगुरुबुधशुक्राणांक्रमेणांशाः पंचैवसमचाष्टौपंच
चपंचाद्ययुग्मभवनेषु भार्गवशशिसुतसुरगुरुरविसुतयमाभिधानांशाःशशिभवना
लिकयोस्तस्यसन्धिः अंतश्चाह्नःप्रत्येकमभिसंवध्यते शशिभवनांतमल्संतेरूपांतस्त
सन्धिः शशिभवनंकर्कटः अलिःवृश्चिकःएषामीनःएतेषामंतेनवमनवमांशे यत्रत
तत्रराश्यपांगपदेवसानेसम्मतस्संधिः तस्मात्केषांतेकर्कटांतेज्येष्ठांतेवृश्चिकांतेवव
संतेमीनांतमिति एतदेवलोकेगंडांतमितिप्रसिद्धं अश्विनीपित्र्यस्तलायामेषसिंहाय

गास्यः विषमर्क्षाणि वर्तन्ते पादहृद्दायपयोन्तरमिति ७ अधुना व्यवहारार्थं मेषादीनां संज्ञाः प
र्यायैराह क्रियताबुरिजितुमकुलीरलेयपाथोनजूककौर्प्याख्याः तौक्षिकआकोकेरोहृ
द्रोगश्चान्त्यभं चेत्थम् इत्यमेवं प्रकारनामानो मेषाद्या राशयो ज्ञेयाः तद्यथा क्रियो मेषः
ताबुरिः वृषः जितुमो मिथुनः कुलीरः कर्कटः लेयः सिंहः पाथोनः कन्या जूकस्तुलः कौ
र्प्याख्यो वृश्चिकः तौक्षिको धन्वी आकोकेरो मकरः हृद्रोगः कुंभः अन्त्यभं मीन इति ८ अधु
ना ग्रहस्य द्रेक्काणहोरानवांशकद्वादशभागत्रिंशांशकादीनां वर्गसंज्ञा व्यवहारार्थमि
दमार्ययाह द्रेक्काणहोरानवभागसंज्ञास्त्रिंशांशकद्वादशसंज्ञिताश्च तेषु च यद्यस्य स
तस्य वर्गो होरेति लग्नं भवनस्य चार्धं द्रेक्काणादयः षट्पदार्था ग्रहस्य वर्गसंज्ञाः द्रेक्का
णो राशित्रिभागः होरा राश्यर्धं नवभागो नवांशकः द्वादशांशो द्वादशभागः त्रिंशांश
कस्त्रिंशद्भागः तेषु राशिः एते सर्व एव ग्रहस्यात्मीयवर्गसंज्ञाः एवं षड्विकल्पा राशिः
षट्स्वात्मीयेष्वंशेषु स्थितो वर्गस्थो ग्रहो भवति न तु ग्रहस्य षड्विकल्पा न संभवन्ति यत
श्चन्द्रार्कयोस्त्रिंशांशकाभावः भौमादीनां होराभावः अतो यथासंभवं आदिविकल
स्थो ग्रहो वर्गस्थ उच्यते यस्माद्भगवान्गार्गिः तेषु होरा च द्रेक्काणाः सप्तभागो नवांशा

कः त्रिंशांशकस्त्ववर्गोयं सर्वस्य स्वउदाहृतः आदिष्वपि पदार्थेषु स्थितः स्वेषु स्ववर्गतः प
रवर्गगतोप्येवं ग्रहो भवतीत्यन्यथेति होरालग्नयोः संज्ञार्थमाह होरेति लग्नं भवनस्या
र्धमिति होरेति लग्नमुच्यते भवनस्य राश्यर्धं होरेति ६ अधुना राशीनां रात्रिदि
नसंज्ञां पृष्ठोदयशीर्षोदयत्वं च वसन्ततिलकेनाह गोजाश्विककर्किमिथुनाः समृ
गा निशाख्याः पृष्ठोदया विमिथुनाः कथितास्त एव शीर्षोदया दिनबलाश्च भवं
ति शेषा लग्नं समेष्वुभयतः पृथुरोमयुग्मं गोजाश्विककर्किमिथुना इति गोशब्देन
वृष उच्यते अजो मेषः अश्वोस्यालीति अश्वो धन्वी कर्की कुलीरः मिथुनः प्रसि
द्धः एते गोजाश्विककर्किमिथुनाः समृगाः मृगेण मकरेण सहिताः षड्राशयो निशा
ख्याः रात्रिबलसंज्ञाः पृष्ठोदया विमिथुनाः कथितास्त एवेति त एव रात्रिसंज्ञाः वि
मिथुनाः मिथुनवर्जिताः पृष्ठोदयसंज्ञा भवन्ति पृष्ठेनोदयं यान्ति मिथुनः पुनः
शीर्षोदयः शेषा इति उक्तेभ्यः शेषाः सिंहकन्यातुलावृश्चिककुंभाः शीर्षोदयाः
शिरसोदयं यान्ति दिनबलाश्च भवन्ति तत्र रात्रिदिनबला इति संज्ञामात्रं यतस्त्व
योबलमत्रवक्ष्यति दिवारात्र्योर्क्कि निशिचयामे सन्ध्योदयेइति एवं समाचा १०

धस्य वचनविरोधः स्यात् तस्मात् संज्ञामात्रं बलग्रहणं यतो यात्रायां वक्ष्यति शास्त्रादिवादि
नबले निशि नोक्तलेरराशेर्विपर्ययबले गमनं प्रशस्तमिति तथा च नष्टजातके रा-
शिपुरं संज्ञं वृषविलोमजन्मेति अस्मल्लेभ्यो मीनस्य विशेषमाह लग्नसमेत्युभयतः पृष्ठो-
दयसंज्ञं पृष्ठोदयमिति स्वस्यः तद्युग्मे मत्स्यद्वयं मीनो राशिः स उभयतः पृष्ठशीर्षाभ्यां
लग्नमासक्तं समेति तदृष्टमिति ९ अथ राशीनां क्रूरसौम्यविभागं स्त्रीपुरुषविभा-
गं लिङ्गाधिपत्वं होराद्रेक्काणपतीनां प्रविभागं मन्दाक्रान्तयाह क्रूरः सौम्यः पुरुषवा-
नितेतरचरागाद्विदेहाः प्रागादीशाः क्रियवृषनृयुक्कर्कटाः सत्रिकोणाः मार्तण्डेन्द्वो-
रयुजि समभे चन्द्रभान्वोश्च होरे द्रेक्काणाः स्युः स्वभवनसुतत्रित्रिकोणाधिपानाम्
क्रूरः सौम्य इति तेराशयो मेषादयो यथाक्रमं क्रूरसौम्यसंज्ञाः तत्र च मेषः क्रूरः वृषः
सौम्यः मिथुनः क्रूरः कर्कटः सौम्यः एवं सर्वेषामूह्यं तेन विषमराशयः क्रूराः समरा-
शयः सौम्याः प्रयोजनं क्रूरेषु जाताः क्रूरस्वभावाः सौम्येषु जाताः सौम्यस्वभावा भव-
न्ति तथा च सत्यः ओजाः पुरुषास्तेयाः क्रूराश्चोक्ताः क्रमाद्युग्माः ओजेष्वाः पुरु-
षाः सौम्याश्च समेषु भवनेषु पुरुषवनिताख्या इति तदेव मेषादयो यथाक्रमं पुरुषव-

नित्ताख्यातेयाः तेनमेषः वृषभः वृषो वनितादी एवं सर्वत्र प्रयोजनं चरस्थिरराशिभुजातानांस्ते
जस्विनः स्त्रीराशिभुजातानां मृदवो भवंति तथा नेचराग्निदिश्याइति तएवमेषादयो यथा
संख्यं चराग्निदिश्यावाभवंति तत्र मेषः चरः वृषः स्थिरो वृषः मिथुनो द्विदेहो द्विस्वभावः
एवं कर्कटादिष्वेतेयं तेनमेषकर्कितुलमकराश्चराः वृषसिंहवृश्चिककुंभाः स्थिराः मि
थुनकन्याधन्वीमीनाद्विस्वभावः प्रयोजनं च चरराशिभुजातानां चलस्वभावाः स्थिरराशि
भुजाताः स्थिरस्वभावाः द्विस्वभावभुजातानां मिश्रस्वभावा भवंति तथा च समसः चरस्था
नादिष्वप्रकृतयश्चेतिराशयः क्रमशः राशिस्वभावतुल्या ज्ञायंते प्रकृतयः प्रसूतानां
प्राणदीनाइति क्रियोमेषः वृषः प्रसिद्धः नृयुक्मिथुनः कर्कटः कुलीरः एतेक्रिय
वृषनृयुक्कर्कटाः सत्रिकोणाः त्रिकोणाभ्यां नवपंचमाभ्यां सहिताः प्रागादिषु पू
र्वादिषु चतसृषु दिक्षु ईशाः स्वामिनः तेन मेषसिंहधन्विनः एवं सा वृषकन्यामक
राः दक्षिणस्याः मिथुनतुलकुंभाः पश्चिमायां कर्कटवृश्चिकमीना उत्तरस्यामिति
प्रयोजनं नष्टादौ दिग्ज्ञानं सूतिकागृहद्वारविज्ञानं च मार्तंडेन्द्वोरि
ति मार्तंडः सूर्यः इन्दुश्चंद्रः अयुग्मयुग्मराश्योर्यथाक्रमं मार्तंडेन्द्वोर्होरे भवतः प्र ११

थमा सूर्यस्य द्वितीया चन्द्रस्य होराशब्देनात्र राशेरर्धमुच्यते समभे चन्द्रभान्वोरिति सम
भे समराशौ चन्द्रभान्वो रविभवतः प्रथमा चन्द्रस्य द्वितीया भानोः सूर्यस्य द्रेष्काणाः
स्युरिति द्रेष्काणो राशित्रिभागः स्वभावनस्तत्त्रिकोणाधिपानां संबंधिनो द्रेष्का
णा इति प्रथमो द्रेष्काणः स्वभावनपतेः द्वितीयः तत्तभवनस्य पंचमस्थानाधिपतेः
तृतीयः तत्त्रिकोणस्य नवमस्थानाधिपतेः तेन मेषस्य प्रथमो द्रेष्काणो भौमस्य।
द्वितीयोर्कस्य तृतीयो गुरोः वृषस्य प्रथमः शुक्रस्य द्वितीयो बुधस्य तृतीयः सौरस्य।
मिथुनस्य प्रथमो बुधस्य द्वितीयः शुक्रस्य तृतीयः सौरस्य कर्कटस्य प्रथमश्चंद्रस्य
द्वितीयो भौमस्य तृतीयो जीवस्य सिंहस्य प्रथमः सूर्यस्य द्वितीय जीवस्य तृतीयो
भौमस्य कन्यायाः प्रथमो बुधस्य द्वितीयः सौरस्य तृतीयः शुक्रस्य तुलस्य प्रथमः
शुक्रस्य द्वितीयः सौरस्य तृतीयो बुधस्य वृश्चिकस्य प्रथमो भौमस्य द्वितीयो जी।
वस्य तृतीयश्चंद्रस्य धन्विनः प्रथमो जीवस्य द्वितीयो भौमस्य तृतीयो रवेः मकर
स्य प्रथमः सौरस्य द्वितीयः शुक्रस्य तृतीयो बुधस्य कुंभस्य प्रथमः सौरस्य द्वितीयो
बुधस्य तृतीयः शुक्रस्य मीनस्य प्रथमो जीवस्य द्वितीयश्चंद्रस्य तृतीयो भौमस्येति

॥ अथ तुलाद्रेक्काणपतीनां लक्षणमनंतरेणाह केचिन्होरां प्रथमां भपस्य वांछंति लाभा
धिपतेर्द्वितीयां द्रेक्काणसंज्ञामपि वर्णयंति स्वद्वादशैकादशराशिपानां केचिद्यवने
श्वरादयः प्रथमां होरां भपस्य राश्यधिपतेः वांछंतीच्छंति द्वितीयां लाभाधिपतेः
एकादशस्थानाधिपतेः यथा मेषस्य प्रथमा होरा भौमस्य द्वितीया सौरस्य एवमन्ये
षामपि द्रेक्काणसंज्ञामपीति स्वद्वादशैकादशराशिपानां द्रेक्काणसंज्ञां वर्ण
यंति कथयंति प्रथमस्याधिपतेः आत्मीयस्वामिनः द्वितीयं द्वादशाधिपतेः तृती
यमेकादशराश्यधिपतेः यथा मेषस्य प्रथमो द्रेक्काणो भौमस्य द्वितीयो जीवस्य
तृतीयः सौरस्य एवमन्येषामपीति तथा च यवनेश्वरः आद्यं तु होरा भवनस्य पा
त्स्वैकादशे तत्पतेर्द्वितीया स्वद्वादशैकादशराशिपानां द्रेक्काणसंज्ञाः क्रमा
च्छ्रुतयोः एवं यवनेश्वरमतेन सर्वग्रहाणां होराधिपत्यं भवति तदाचार्यस्य
नाभिप्रेतमस्माद्धोराणामपि तथा च सत्यः ओजेषु पूर्वे होरा प्रथमा तु समेषु चांत्या
प्रोक्ता इन्द्रेः क्रमशो द्रेक्काणा जन्मनि वेश्माद्धोरायां राशिद्रेक्काणास्तत्पंचमनवम
भवनपतयस्तु तेषामधिपतयः स्युः स्वद्रेक्काणग्रहावलिरिति १२ अथ ग्रहा १२

णामुच्चनीचपरमोच्चविभागं प्रदर्शयन्नाह अजवृषभमृगांगनाकुलीराझषवणि
जौचदिवाकरादितुंगाः दशशिखिमनुयुक्तिथीन्द्रियांशैस्त्रिनवककविंशतिभिश्चते
स्तनीचाः अजादयो राशयो यथाक्रमेण दिवाकरादीनां ग्रहाणां तुंगा उच्चसंज्ञाः त
थथा अजो मेषः सूर्यादित्यस्योच्चः वृषभो वृषः सचन्द्रस्य मृगो मकरः भौमस्य
अंगना कन्या सा बुधस्य कुलीरः कर्कटो जीवस्य झषो मीनः शुक्रस्य वणिक् तुलः
सौरस्य एत एव राशयो राश्यादिदिश्चेतराः तत्रादित्यस्य मेषो दशमभागे उच्चः चंद्रा
स्य वृषः शिखिसंज्ञस्तृतीयभागे भौमस्य मकरो मनुयुक्संख्य अष्टविंशे मनवा
श्चतुर्दश तेषां युग्मं द्विगुणा मनवश्चाष्टविंशः बुधस्य कन्या तिथिसंख्ये पंचदशे गुरुः
कर्कटस्येंद्रियसंख्ये पंचमे शुक्रस्य मीनः त्रिनवसंख्ये सप्तविंशे सौरस्य तुलाविं
शे भागे तत्र सर्व एव राशिरुच्चसंज्ञाः सचत्रिंशांशे दशांशकः तत्र दशांशादीनां तद्रा
नर्मं तानाम् सिद्धे वा उच्चसंज्ञा न किं दशाद्युपादानं सत्यं किंतु परमोच्चसंज्ञार्थं दशा
शादीनां ग्रहणं अन्यथा सर्व एव राशिरुच्चसंज्ञाः तेनोक्तराशिदशाद्यंशका
संज्ञा बाधिता ग्रहाः परमोच्चस्था उच्यंते परमोच्चस्थानेन चोच्चव्यतिरिक्तस्य

योजनमस्ति तथा च भगवान्गार्गिः सूक्ष्मगोरो विशीनां स्वजनुयेतं नराधिपं उच्चस्थाय
नितं ख्यातं स्वत्रिकोणगतावपीति तथा च यवनेश्वरः सोच्चेषु स्वक्षेत्रस्थितिषु हस्तभागा
स्थितस्य सर्वे शुभफलाधिकेषु लग्नशुभेषु रवौ वशुभ्रतौ नीचैः त्रैलोक्यराज्याधिपतेः प्र
सूतिः अथैषां दशाण्णवं विधाः सूर्यादयः परमोच्चस्थाद्रहस्याः तत्र कृतं भगांशस

सू	चं	भौ	बु	जी	शु	शं
०	१	९	५	३	११	६
१०	३	२८	१५	५	२७	२०
०	०	०	०	०	०	०

यांताद्दशाद्यय आचार्येणोक्तत्वात्सूर्यगणीशत्रयांतत्वमेषा
यवनेश्वरवाक्याज्ज्ञायते तथा च यवनेश्वरः सूर्यस्य भा
गो दशमे तृतीये सोमस्य जीवस्य च पंचमे स्यात् सौरस्य वि
शे तत्र विसममेत्रविधाङ्गोः पंचदशो बुधस्य भौमस्य विं
शे ष्टसुतेतृ सूर्यस्य विंशदृहे स्वबलवेनिवेशं तत्तन्नीचा इति तत्रादित्यादयः अ
स्तनीचाः अस्तानीचायबाते अस्तः सममः प्रकृतत्वात्स्वात्समम: अस्मकस्मनीचः
तद्यथा आदित्यस्य तुलान्मेषान्तसममकत्वलः सवनीचसंज्ञः एवं चंद्रमसो वृश्चिकः भौ
मस्य कर्कटः बुधस्य मीनः गुरोर्मकरः शुक्रस्य कन्या सौरस्य मेषः इति अत्रापि
दशादिशुभागो बुधपरमनीचस्थाद्रहस्याः तथा च यवनेश्वरः सोच्चान्तगामिन्या

१२

मूर्द्धांतिनीचंत्रिंशालवोयस्य समानसंख्यः अथेष्टभोग्यास्तः धारवाद्दयः परमनीच

सू	चं	भौ	बु	जी	शु	शं
६	७	३	११	९	५	०
१०	२	२०	१४	४	२६	१९
०	०	०	०	०	०	०

स्थाभवंति परमस्थानामनिष्टफलंभगवत्तागार्गिणा
प्रष्टतथावगार्गिः अन्येदिगंवंरमतंवपरापिज्ञोपज्ञो।
विनं ऊर्ध्वानामतिनीचस्थोशरूपं शशिभास्करावितिं
१२ अथमूलत्रिकोणांवर्गोत्तममूलत्रिकोणपरिज्ञानं
वसंततिलकेनाह वर्गोत्तमाश्चरहादिषुपूर्वमध्य
पर्यंततः शुभफलानवभागसंज्ञाः सिंहोवृषः प्रथमषष्ठहयांगतौलिकुंभा।
स्त्रिकोणभवनानिभवंतिसूर्यात चरदृहादिषुचरस्थिरद्विस्वभावेषुराशिषु
यथासंख्यंपूर्वमध्यपर्यंततः आदिमध्यावसानतोयेनवभागास्तेवर्गोत्तमसं
ज्ञाभवंति वर्गोत्तमांशकसमस्तेउत्तमाः प्रधानाः वर्गोत्तमाः तथाचचरेषुमे।
षकर्कटतुलमकरेषुप्रथमोनवांशकोवर्गोत्तमाख्योभवति स्थिरेषुवृष
सिंहवृश्चिककुंभेषुमध्यमः पंचमः द्विस्वभावेषुमिथुनकन्याधनुर्मीनेषु
पर्यंततः नवमनवांशकोवर्गोत्तमः एतदुक्तंभवति प्रत्येकस्मिन्राशौव

बृ.जा.
टी.
१८

नवांशकोवर्गोत्तमाख्यइति तथाचयवनेश्वरः स्वेस्वेगृहेस्वस्वगृहांशकायेवर्गोत्तमा
स्तेयवनैर्निरुक्ताइति शुभफलानवभागसंज्ञाइति तेचवर्गोत्तमाख्यानवभाग
संज्ञाजन्मनिशुभफलदाः शुभंफलंददतिइति वक्ष्यतिचशुभंवर्गोत्तमजन्मनीति तथा
चयवनः चरभवनेषाद्यंशाः स्थिरेशुभमध्याद्विमूर्तिषुतथांत्याः वर्गोत्तमाःप्रदिष्टा
स्तेषिद्धनामाःकुलेमुख्याः सिंहोवृषइत्यादि सिंहादयोयथापाठक्रमेणसूर्या
दीनांग्रहाणांत्रिकोणभवनानिभवंति तद्यथा सिंहः सूर्यस्यादित्यस्यत्रिकोण
संज्ञः वृषश्चंद्रस्य प्रथमोमेषोंगारकस्य षष्ठःकन्याबुधस्य स्वधांगोधन्वीबृह
स्पतेः तौलीशुक्रस्य कुंभःसौरस्येति ४ अथवालग्नादीनांद्वादशानांस्थानानां
तन्वाद्याद्वादशसंज्ञाः तृतीयषष्ठदशमैकादशानामुपचयसंज्ञांवसंततिल
केनाह होरादयस्तनुकुटुंबसहोत्थबंधुपुत्रारिपत्निमरणानिशुभास्पदायाः
रिष्फाख्यमित्युपचयान्यरिकर्मलाभदुश्चिक्यसंज्ञितगृहाणिननित्यमेके हो
रादयोलग्नादयः तेषांक्रमेणतन्वादीनिनामानि तत्रलग्नस्यतनुरितिसंज्ञाद्वि
तीयस्यकुटुंबः तृतीयस्यसहोत्थः चतुर्थस्यबंधुः पंचमस्यपुत्रइति १८

15

वादी प्रज्ञाख्यःपंचमः अरिःशत्रुःनत्ताख्यः षष्टः पत्न्याख्यःसप्तमः मरणाख्योऽष्टमः
शुभाख्योनवमः आस्पदाख्योदशमः आयएकादशः रिःफाख्योद्वादशइति
इतिशास्त्रः प्रकाशार्थः तेनहोरादीनांतन्वादयः पर्यायसंज्ञाभवंतीत्येवावगंत
व्या उपचयान्यरिकर्मलाभदुश्चिक्यसंज्ञितानिहोराणीइति अरिःषष्ठं कर्मदश
मं लाभएकादशं दुश्चिक्यसंज्ञंतृतीयं एतानिहोराणिउपचयसंज्ञानीति
नित्यमेकेइति एकेकेचिन्ननित्यमुपचयस्थानानिवर्णयंति तेषामयमभि
प्रायः यदिपापग्रहेणशुभेनमिश्रेणवादृष्टाभवंति तदानोपचयाः तेनगा
र्गादयोयथाहुः त्र्युपचयसंज्ञास्त्रिलाभारिशुकर्मणां नचेद्दृष्टानिदृष्टास्तेपा
पग्रहामिश्रश्रमिथिरिति एतदाचार्यवराहमिहिरस्यनाभिप्रेतं यतोसौसर्वदेवो
पचयांस्तेष्वेवहरति सत्याचार्योप्येवं तथाचसत्यः दशमैकादशषष्ठतृतीय
संज्ञानिजन्मलाभाभ्यां उपचयभवनानिस्युःशेषाणिस्थानाण्यपचयाय यवनस्य
त्र्य षष्ठंतृतीयंदशमंचराशिमेकादशंचोपचयंत्वमाहुः होराग्रहस्थानवशा
च्छाकमेभ्यः शेषाणिचैवापचयात्मकानि १५ पुनरपिहोरादीनांसंज्ञान्तरंवक्त

बृ.जा.
टी.
१५

15

नतिलकेनाह कल्पस्वविक्रमगृहप्रतिभाक्षतानिचित्तोत्थरन्ध्रगुरुमानभवव्ययानि लग्ना
च्चतुर्थनिधनेचतुरस्रसंज्ञेद्यूनंचसप्तमगृहंदशमर्क्षमाज्ञा एवामपिलग्नादीनांद्वाद
शानांयथाक्रमंकल्पाद्याः संज्ञाः तद्यथा लग्नंकल्पो द्वितीयंस्वंतृतीयंविक्रमः चतुर्थ
गृहं पंचमंप्रतिभा षष्ठंक्षतं सप्तमंचित्तोत्थः अष्टमंरन्ध्रं नवमंगुरुः दशमंमानं एका
दशंभवः द्वादशंव्ययः लग्नाच्चतुर्थनिधनेइति लग्नाच्चतुर्थस्थानंनिधनमष्टमं
चैतेचतुरस्रसंज्ञेचतुरस्राख्ये लग्नात्सप्तमंगृहंद्यूनं दशमर्क्षंदशमराशिराज्ञाख्यं
१६ अथकेन्द्राणांसंज्ञाः तत्स्थराशिबलंचदोषकेनाह कंटककेंद्रचतुष्टयसं
ज्ञाः सप्तमलग्नचतुर्थखभानां तेषुयथाविहितेषुबलाढ्याः कीटनरांबुचराः
पशवश्च सप्तमलग्नचतुर्थानिप्रसिद्धानि खंदशमं एतेषांसप्तमलग्नचतु
र्थखभानांराशीनांप्रत्येकंसंज्ञाकंटककेंद्रचतुष्टयइति त्रिसंज्ञाः एतेषुस्था
नेषुयथाविहितेषुयथोक्तेषुकीटनरांबुचराः पशवश्चक्रमेणबलाढ्याभवं
ति तद्यथा कीटोवृश्चिकःसप्तमेस्थानेबली नराद्राशयोमिथुनकन्यातुलकुं
भधन्विपूर्वार्धाः एतेलग्नस्थिताबलिनः अंबुराजलराशयःकर्किमीनमकरापर

गार्धाः ते चतुष्पदबलिनः पश्चात्तत्पूर्वा मेषवृषसिंहधन्वपूर्वार्धमकरपूर्वार्धाः ते
दशमस्थाने बलिनः तथा च भगवान्गार्गिः नृयुक्तुलाघटकन्यापूर्वमर्धं च धन्वि
नः लग्नस्था बलिनो ज्ञेया एते हि नरराशयः चतुष्पदकर्कटो मीनो मकरार्धं च पश्चि
मे विज्ञेया बलिनः सप्तमगे ते हि जलराशयः सप्तमे वृश्चिको राशिर्बलवान्परिकी
र्तितः धन्वन्त्यार्धाजगोसिंहा बलिनः खचतुष्पदाः पश्चार्धश्चाह्न मकरपूर्वार्धो
गृहीतनशेति ८ केन्द्रात्परं पणफरं परतश्च सर्वमापोक्लिमं हिबुकमेषूरणवेच
वेश्म जामित्रमस्तभवनं लग्नभं त्रिकोणं मेषूरणं दशममत्र च कर्म विद्यात्
सर्वस्मात्सर्वतः केन्द्राद्धि तीयस्थाने सर्वे पणफरं तेन द्वितीयपंचमाष्टमैकादश
स्थानानां पणफरसंज्ञा परतश्च सर्वमापोक्लिमं तेन तृतीयषष्ठनवमद्वादश
नां स्थानानामापोक्लिमेति संज्ञा हिबुकमेषूरणवेश्म वेश्म शाहोऽष्टकपर्या
यः वेश्मेति चतुर्थस्य प्राक्तनानि हि नानि एवं हिबुकसंज्ञा च जामित्रमस्तभव
नं सप्तमस्थाने यतः सर्व एव ग्रहा उदयराशेः सप्तमे मस्तं यान्ति तेन वास्तभवनं
जामित्रं लग्नभं त्रिकोणं लग्नभं पंचमस्थाने त्रिकोणसंज्ञा मेषूरणं दशमं दश

बृ.जा.
टी.
१६

मेस्थानं मेषवर्गमंते तत्रासिन्दर्शमे स्थानेके मे स्य परां संज्ञां विद्याज्जानीयात् ॥ १८ ॥ अधुना
होरादीनां राशीनां बलरव्याणं शार्दूलविक्रीडितेनाह होरास्वामिगुरुज्ञवीक्षितयु-
ता नान्यैश्च वीर्योत्कटाः केन्द्रस्था द्विपदादयोह्नि निशि च प्राग्भे च सन्ध्याद्वये पूर्वार्धे
विषयाद्ययः कृतगुणाभानं शतीपंचतनुष्टिकां सहजेन तपश्च नवमं त्राप्यं त्रिकोणं
च तत् ॥ होरालग्नं स्वामिना नत्पतिना वीक्षिता दृष्टा वीर्योत्कटातिबलवती भवति
युक्ता संयुक्ता च तथा च गुरुणा बृहस्पतिना वीक्षिता दृष्टा वीर्योत्कटा बलवतीति
नान्यैश्चेति अन्यैः ग्रहैः स्वामिगुरुज्ञवर्जितैः शेषैः यदि युता दृष्टा च तदा वीर्योत्क-
टा न भवति तदा मध्यमबला अर्थात् स्वामिगुरुज्ञवर्जैरन्यैर्युता दृष्टा बलवती
न भवति तथा च बादरायणः जीवज्ञनाथशशिभिर्युता दृष्टा भवति बलवती हो-
रा शेषैर्बलहीना स्यादेवं मिश्रैस्तु मिश्रबला बलहीना यदि सैवं तैर्वीक्षिता नैवे
वं संयुक्ता केन्द्रस्था इति वीर्योत्कटा इत्यनुवर्तते तत्रादिशब्दो लग्नादष्टव्यः
केन्द्रस्थाः सर्व एव राशयो बलिनो भवन्ति पणफरापोक्लिमादिपदचतुष्प-
दकीटानां यथाक्रमं बलवत्त्वमावर्तते तदुक्तं तथा च बादरायणः केन्द्र-

१६

स्याद्बलिनः स्युर्मेषाद्बलाः पृष्ठोदयास्त्रिता ज्ञेयाः प्रायो क्लिमगाः सर्वे हीनबल
राशयः कथिताइति द्विपदाद्यो क्लिनि शिवग्रामे च सन्ध्याह्वयेइति वीर्या।
कटादस्नज्ञवर्तने द्विपदाद्यो द्विपदचतुष्पदकीटाय यथाक्रमम क्लिचाने।
शिवग्रामे च सन्ध्याह्वया क्लिदिने द्विपदा बलिनो निशि वा चतुष्पदाः
संध्याह्वये कीटाः नत्रान्ये कीटग्रहणेन वसेयाः नत्र चश्रीदेवकीर्तिः मिथुनतुलकुंभ।
कन्यादिवाबलाधनिनक्रश्चैवोर्ध्वं ग्रजवृषसिंहाराज्ञोमृगहृदययोः एवं पश्चार्धे वृ
श्चिकमीनकुलीरमकरांत्यार्धं च सन्ध्यायामिति एवोर्ध्वे विषयादयः कृतगुणा
इति विषयाइंद्रियाणिनानि च पंच नवादयः पंचषट्समाञ्च नवदशायावत प
तेसर्वएव कृतगुणाश्चतुर्गुणिताः एवोर्ध्वेमानं कस्य प्रकृतं तत्राह चक्रस्य एवो
र्ध्वे प्रथमराशिषट्के इत्यर्थः प्रतीपं चतत् पश्चवक्रस्य एवोर्ध्वेमेषादीनां षण्णां तदे
व प्रतीपं विपर्ययात् तुलादिषट्कमानं तद्यथा विषयादयः ५ ६ ७ ८ ९ १०
एते चतुर्गुणाजाताः २० २४ २८ ३२ ३६ ४० चत्वारिंशतस्त्रिंशन्तराः स्युर्विंशतिभागाभवं
न्ति मेषादीमानमित्यर्थे एवं मीनाद्येचोत्क्रमादर्धे भागा व्यवहाराः तद्देत्रं भागेन

वृ.ज्ञा
टी
८

17

केनकालेनदशचषकाभवंति तस्मादाद्यःदैवलिप्ताःसकालेप्रमाणाइति तस्मादुक्तद्वा
दशगुणनेनोक्तं लंकायांसमपश्चिमगंप्रमाणेनकलाभमंडलेविभमतीति एवमेतेभागा
दशगुणितानाच्चषकाभवंति तेनचषकाभवंति तेनचषकशतद्वयंमीनमेषयोःप्र
माणं एवंचसाविंशदधिकंशतद्वयंवृषकुंभयोः शतद्वयमशीत्यधिकंमिथुन
मकरयोःशतत्रयंविंशत्यधिकंकर्कटधनुषोः शतत्रयंषष्ठ्यधिकंसिंहवृश्चिक
योः शतत्रयंविंशत्यधिकंचतच्चयंकन्यातुलयोः एतेएवंचषकादशविभक्ताभा
गास्तेपरिकल्पिताः यतःतेत्रदशभिस्त्रपकेभांशोभवति तत्रचषदलवशा
न्नित्येशमन्यत्रपंभवांशदयेषुगणितस्कन्धसिद्धेभुकिमर्थमेकवृषंतदुदा
यप्रमाणंदर्शितमाचार्येण अत्रोच्यते नष्टचिंतास्वधर्मविज्ञानायभूरुषावय
वानांचकुवर्गदीर्घत्वज्ञापनायोपयुज्यते तथाचयवनेश्वरः एवंप्रमाणानि
गृहाणिहृस्वानिमध्यानितथाचतानि चक्रांगभेदैःसहशीर्षकृतानिमा
नप्रमाणानिविकल्पयंत अंगविभागकल्पनावन्ते कालादिविलग्नविभ
क्तभागाइति तत्रयस्मिन्नेगदीर्घराशिभवति दीर्घाधिपोग्रस्तांगमतीवदी ८

वं भवति एवं मध्ययोर्मध्यं ह्रस्वयोर्ह्रस्वमिति तथा च सारावल्यां ह्रस्वास्तिमिगो
विघटामिथुनघटाः कर्किमृगधन्वाख्यसमाः वृश्चिककन्यामृगपतिवणिजो
दीर्घाः समाख्याताः एभिर्लग्नादिगतैः शीर्षप्रभृतीनि वक्षशीर्षाणि सदृशानि
विज्ञायंते गगनचरैर्दृष्टैर्वत्तलानीति तथा च सत्यः दीर्घाधिपतिर्दीर्घे ह्रस्वे ह्रस्व
नावयवकृद्भवति एवमादि षष्ठे श्रुपदे बविलग्नकार्या लग्नाद्व्ययनिमूष
णगीता नस्कन्यमिदेवकार्यमिति वृश्चिकं सहजमिति सहजमन्तं नीयस्यात
सद्वृश्चिकसंज्ञा नवमस्य तपःसंज्ञा आद्यंत्रिकोणं च तत नेदवनवमस्यान्ते
आद्यंत्रिकोणं त्रिशरा आद्यस्य त्रिकोणस्य तत आद्यंत्रित्रिकोणमित्यर्थः त्रिको
णं च नेदवनवमामिति ९ अथ नानाराशिवर्णान्मंदाक्रांतयाह रक्तः श्वेतः शु
कतनुनिभः पाटलो धूम्रपाण्डुश्चित्रः कृष्णः कनकसदृशः पिंगलः कर्बुरश्च
बभ्रुः स्वाभः प्रथमभवनाद्येषु वर्णाः प्लवत्वं स्वाम्याशाख्यं दिनकरभुजाद्या
द्वितीयं च बभ्रिः प्रथमभवनो मेषः तदादिषु यथाक्रमम् एते वर्णाः तत्र मे
षो रक्तो लोहितवर्णः वृषः श्वेतः मिथुनः शुकतनुनिभः नीलहरितवर्णः कर्कटः

पाटलः पाटलपुष्पवर्णः ४थः कर्कटकस्येत्यर्थः सिंहो धूम्रपांडुरः ५छत्रः कन्यावि-
चित्रानानावर्णेत्यर्थः तुलाः कृष्णः वृश्चिकः कनकसदृशः सुवर्णवर्णः धन्वी पिंग-
लः कपिलः मकरः कर्बुरः शुक्लकृष्णव्यामिश्रवर्णः कुंभो बभ्रुः कपिलः मीनः स्वच्छ
र्णमत्स्यवर्ण इत्यर्थः प्रयोजनं वियोनिज्ञाने लग्नांशकादिभिर्वदति प्लवत्वं स्वा-
म्याशाद्येमिति स्वामिनश्चाशादिकं स्वाम्याशा तत्र प्लवत्वं प्लवस्वभावः प्लवत्वं सर्वे-
ष्वाशेः स्वाम्याशायां प्लवत्वं निम्नत्वमित्यर्थः तद्यथा मेषवृश्चिकयोर्भौमोधिपतिः त-
स्य दक्षिणादिक् तत्र तेनाप्लवसंज्ञौ वृषतुलयोः शुक्रोधिपतिः तस्याग्नेयी दिक्
तत्र तेनाप्लवसंज्ञौ मिथुनकन्ययोर्बुधोधिपतिः तस्योत्तरा दिक् तत्र तेनाप्लवसंज्ञौ क-
र्कटस्य चंद्रोधिपतिः तस्य वायवी दिक् अतस्तत्र प्लवसंज्ञः सिंहस्यार्कोधिपतिः त-
स्यैशानी दिक् तत्र प्लवसंज्ञा एवं राशिस्वामिनो या दिक् तद्दिक्प्लवा राशिरित्यर्थः
प्रयोजनं तु हृतनष्टगमनं चौरादेः ग्रहस्य यात्राया अपयुज्यते तथा च सारावल्या
भवनादीनामुप्लवः इत्ययवनैः प्रवन्धतः कथितः तत्र प्रवदामि विनिहत्यादि विचे-
ण्महीपतिः शत्रून् इति दिनकरगुप्ताज्जाहितं यच्च वसिष्ठः दिनकरस्यैतेन। १८

पुनोयोगादिशास्त्रस्माद्द्वितीयायावेसिसंज्ञः प्रयोजनंयात्रायांवक्ष्यति वेसिर्विलग्ना
पगतोयियासैाविति यथावेसिस्थानेसंग्रहहस्नादि अत्रसंज्ञाध्याययाःसंज्ञा
उक्ताः नादिप्रकाराः तत्रकाश्चित्संज्ञामात्रप्रयोजनाः यथालग्नस्यहोरावान्तीयसदृ।
श्चिका चतुर्थस्याहिवुकंपंचमस्यत्रिकोणं सप्तमस्यद्यूनं नवमस्यतपःत्रित्रिकोण
संज्ञाच दशमस्यमेषूरणसंज्ञा द्वादशस्यरिफुर्फचतुर्थाष्टमयोश्चतुरस्रसंज्ञा लग्न
चतुर्थसप्तमदशमानांकंटकसंज्ञाकेंद्रसंज्ञचतुष्टयसंज्ञाच तथाद्वितीयपंचमा
ष्टमैकादशस्थानानांपणफरसंज्ञा तृतीयषष्ठनवमद्वादशानामापोक्लिमसंज्ञा
एताःसंज्ञामात्रप्रयोजनाःश्मायुफलनिर्देशप्रयोजनाः तत्रलग्नस्यतनुसंज्ञाकल्प
संज्ञाच तेनलग्नादारोग्यान्वेषणंशरीरवृद्ध्यन्वेषणंचकार्यं द्वितीयस्यस्वसंज्ञा
कुटुंबसंज्ञाच तेनतस्माद्धनस्यान्वेषणंकार्यं तृतीयस्यसहजसंज्ञाविक्रमसं
ज्ञाच तस्माद्भ्रातृणांपुरुषार्थस्यवान्वेषणंकार्यं तृतीयस्यसहजसंज्ञाविक्रम
संज्ञाच तस्माद्भ्रातृणांपुरुषार्थस्यचान्वेषणंकार्यं चतुर्थस्यवेश्मसंज्ञासुखवा।
संज्ञाबन्धुसंज्ञाच तेनतस्मात्सुहृत्सुखवाहनबान्धवानांचान्वेषणंकार्यं तृतीयस्यउ

19

हिबासंज्ञापुत्रसंज्ञाच तेनतस्माद्बुद्धिपुत्रयोरन्वेषणंकार्यं षष्ठस्यतनारिसंज्ञात्
त्रशाह्वोव्रणनावौअरिशब्दःशत्रुवाची तेनतस्माद्व्रणशत्रुभेदेचयोरन्वेषणंकार्यं
सप्तमस्यचित्तोत्थदारजामित्रसंज्ञाच चित्तोत्थशब्दःकामवाची तेनतस्मात्कामा
भार्याविवाहान्वेषणंकार्यं अष्टमस्यरन्ध्रमरणसंज्ञा रन्ध्रशब्दःपापपर्यायः
मरणंप्रसिद्धः तेनतस्मात्पापमरणान्वेषणंकार्यं नवमस्यशुभगुरुसंज्ञा शुभ
शब्देनात्रधर्मोज्ञेयः गुरवोमातापितृपूर्विकाः तेनतस्माद्धर्मस्यमातापितृपूर्वि
काणांगुरूणांचान्वेषणंकार्यं दशमस्यास्पदकार्यसंज्ञा आस्पदशब्दःक
र्मवाचीकर्मतच्चप्रसिद्धं तेनतस्मात्क्रियाभावयोरन्वेषणंकार्यं एकादशस्य
भवायसंज्ञा भवशब्दोत्रविद्यादिगुणसंपत्त्याभिवचनः आयशब्दोर्थवाची
तेनतस्मात्तयोरन्वेषणंकार्यं तृतीयषष्ठदशमैकादशस्थानानांउपचयसं
ज्ञा उपचयकरत्वादिदंचैतेषामुपचयकरत्वमपिहितत्रस्थाः पापाअपिशु
भफलदाभवंति तथाषष्ठस्थानंविनासौम्याःसर्वत्रभावबृद्धिकराःषष्ठ
स्थाःपुनर्विहतानिकुर्वंति पापास्त्वपचयस्थाभावबृद्धिंकुर्वाणाअपिषष्ठ

मुपचयस्थानेष्वाप्यन्तःस्थितं दृष्टभावयोरपि तत्तयोरपि हानिं कुर्वन्ति यतस्तेषा
मुपचयस्तस्मिन्नर्थोऽस्ति तासुपचयस्थानस्तु एव पापाभावहानिं कुर्वन्त्यपि अष्टम
हादशस्थाने विषमनिष्टभावभावस्थानिष्टतानस्थानस्यापचयात्मकत्वाद्ध
द्विं प्रापयन्ति तथा च श्रीदेवकीर्तिः सौम्याः बहुपापास्तन्वर्थसहजोत्थधर्मधी
सुतगाः कुर्युर्भावविपत्तिं शेषोपगतास्तु तद्वृद्धिमिति एतद्विशेषवचनेन वा
सर्वं व्यापितमिष्टमिति २ इति श्रीभट्टोत्पलविरचितायां लघुजातकविवृ
तौ राशिभेदो नाम प्रथमोऽध्यायः १ अथातो ग्रहयोनिभेदोऽध्यायो व्याख्या
यते तत्र चराचरं जगद्ग्रहमयमेव प्राक् च कालात्मनोऽस्य रूपस्य कालाङ्गा
नीत्येवमादिना राशितत्त्वमयोगविभागः प्रदर्शितः चेद्दृश्योऽनेन च ग्रहम
य एवासौ प्रदर्शितो भवति यतो राशिस्वामिनो ग्रहा एव अधुना तस्यात्मादी
न्भावान्ग्रहमयानेव जगन्मालकालस्याऽऽर्याद्वयेनाह ग्रहमयानेव शार्दूलविक्री
डितेनाह कालात्मा दिनकृन्मनस्तुहिनगुः सत्वं कुजो ज्ञो गिरां जीवो ज्ञानं
सितश्च मदनो दुःखं दिनेशात्मजः राजानौ रविशीतगू क्षितिसुतो नेता

बृ.जा.
टी.
२

क्रमाद्बुधः सूरिरिज्यो नवसितस्यविशेषः स्मरः स्वासुतः कालात्मा दिनकृदिति
कालस्यात्मा दिनकृत् सूर्य एव कालपुरुषस्यात्मा मनः तुहिनं हिमं तद्वत् शीतला गावो य
स्यासौ तुहिनगुः सत्त्वं कुजो भौमः यस्य बलं तत् अविकारकं सत्त्वं व्यसनाभ्युदयो
पगमेऽतुल्यं स्वभाववृत्त्यर्थः ज्ञो बुधः गिरं वाचः जीवो बृहस्पतिः ज्ञानं सुखं
चैतत् ज्ञानमत्रावेसितः शुक्रो मदनः कामः दिनस्येशो दिनेशः सूर्यः तस्यात्मजः पुत्रः
शनैश्चरो दुःखं तत्र कालपुरुषस्य सर्वगतस्य दर्शनार्थं तत्र च केवलं
कालात्मस्वरूपस्य मेषाद्या राशयः शिरः प्रभृत्यंगविभागेन स्थिता इति
यावत् आदित्यादयोऽस्मिन् विभागेन सर्वस्य जगतः स्थिताः प्रयोजनं पीडि
तेऽङ्गे देहवतोऽपि तदंगं भावात्मत्वात् पीडनं वक्तव्यं पुष्टे पुष्टिरिति न केव
लं यावज्जन्मनि बलवद्भिर्ग्रहैरेतत् एव भागा आत्मादयः शुभा भवन्ति दुर्व
लैर्दुर्बलाः किं तर्हि सारस्याविपरीतं तथा च सारावल्याम् आत्मादयो गगना
गैर्बलिभिर्बलवत्तराः दुर्बलैर्दुर्बला ज्ञेया विपरीतं शनेः स्मृतमिति रा
ज्ञानाविन्यासात् रविरादित्यः शीतगुश्चन्द्रः एतौ राजानौ क्षितिसुतस्त्वस्याः

२

स्वेतांगारकः सेनानीसेनाधिपतिः कुमारो बुधः कुमारो युवराजः राजपुत्र
इति केचित् सूरिः बृहस्पतिः दानवपूजितः शुक्रः एतौ सचिवौ मंत्रिणौ
सहस्रांशुः सूर्यः तस्माज्जातः शनैश्चरः सप्रेष्योदासः तत्र जगत्पालकप्रक
रणाच्छनैश्चरः प्रेष्यः किमत्रोच्यते प्रेष्यापि कर्मणोपालकएव प्रयोजनंत
स्मातिप्रश्नकालेवा वलवान् उपचयस्थो ग्रहो भवति तदैको राज्यादिकर्त्ता।
स्वकार्यसाधको भवति ग्रन्थधारानिकवः १ अधुनाग्रहवर्णावाह सूर्यं च
द्रं बुधांगारकशनैश्चराणां संज्ञामालिन्याह हेलिः सूर्यश्चंद्रमाः शीतरश्मि
हिमगुर्विज्ञो बोधनश्चेंदुपुत्रः आरो वक्रः क्रूरदृक्चावनेयः कोणो मन्दः सूर्यपु।
त्रोसितश्च सूर्यस्यादिमः हेलिसंज्ञा चंद्रमाः शीतरश्मिसंज्ञा इंदुपुत्रो बु
धः सहज्ञाविनज्ञः बोधनः एतास्तस्य संज्ञाः अवनिर्भूमिस्तस्यापत्यमा
वनेयो भौमः सच आरो वक्रः क्रूरदृक् सूर्यपुत्रः सौरः सकोणः मन्दः असितः
२ अधुनागुरुशुक्रकेतुराहूणां संज्ञावसन्ततिलकेनाह जीवांगिरसः सु
रगुरुर्वचसांपतीज्यः शुक्रो भृगुर्भृगुसुतः सित आस्फुजिच्च राहुस्तमो गुरस

सू.ना
टी
२१

रश्मिशिखीति केतुः पर्यायमन्यमुपलभ्य वदेच्च लोकात् जीवो बृहस्पतिः स एवांगि
राः सुरगुरुः वचसांपतिः इज्यः शुक्रः भार्गवः स एव भृगुः भृगुसुतः सितश्चास्फुजित्
उशना ह स समुच्चयेऽर्थे एताः शुक्रस्य संज्ञाः राहुः स्वर्भानुः स एव तमः अगुः नविधेन
गावो रश्मयो यस्मात् अगुः पिबन्ति अर्थः असुरो दैत्यः एता राहोः संज्ञाः शिखी केतुः के
तो शिखीति संज्ञा अन्यत्पर्यायं लोकादन्यशास्त्रादुपलभ्य ज्ञात्वा वदेत् यथा
रविस्तीक्ष्णांशुः दिवाकरो भास्वान् नीता रश्मिमान् इत्यादिकाः संज्ञाः सूर्यस्य शी
तांशुः ग्लौ हिमद्युतिः शशांकः शशी निशाकर इत्याद्याश्चंद्रस्य संज्ञाः कुजो
लोहित इत्याद्या भौमस्य सौम्यो रौहिणेय इत्याद्या बुधस्य सूरिः सुरेड्य इज्यो
वाक्पतिरित्याद्या गुरोः भार्गव उशना दैत्यपूज्य इत्याद्याः शुक्रस्य यमः सौरिरि
त्याद्याः सौरस्य सैंहिकेयः स्वर्भानुरित्याद्या राहोरिति २ अथ ग्रहाणां वर्णान्
मालिन्याह रक्तश्यामो भास्करो गौर इंदुर्नात्युच्चांगो रक्तवर्णोऽश्च वक्रः दू
र्वाश्यामो ज्ञो गुरुर्गौरगात्रः श्यामः शुक्रो भास्करिः कृष्णदेहः रक्तश्यामो
श्यामो रक्तश्यामः पाटलपुष्पवर्णो इत्यर्थः एवंविधो भास्करः सूर्यः इंदु २१

21

ऋक्षमो गौरः श्वेतश्यामः वर्णो गायकः सवनाम्लांगः नातिदीर्घः शुक्रो गौरः पद्मपत्रा ।
भः सौम्यः सहर्वाश्यामः शाद्वलप्रवालवर्णाः गुरुर्हस्वानिः सगौरवर्णो बो गौर
शरीरः शुक्रः श्यामवर्णो नातिनीगौरो नापि तं कुलश्यमर्थः भास्करिः सौरः सहस्त्रदेहः
असितशरीरश्यमर्थः वर्णानानप्रयोजनं सर्वग्रहेषु याबलवांस्तवर्णास्तत्का
लेजातो भवति प्रश्नकाले वा यादवापि ॥ अधुना वर्णान्याह ग्रहाणामहृदेव
नाश्रितकस्याम्य सौम्यपापत्नं शाद्वलविकीर्तितेनाह वर्णाम्नासिताति
तरहितनत्पापीत चित्रासितावसंतु शिनकेशावंद्रशाविकाः सूर्यादिनाथाः
क्रमात् शुणायाः विष्णुकालोहितनमः सौर्वं इविनस्वयः श्रीगांडर्कमहोह
नाकेनतयाः पापाद्धधस्तोद्भुतः वर्णाद्व्यादि नाम्नादयो वर्णाः सूर्यादित्या
हनाथाः सूर्योदयो ग्रहानाथाः स्वामिनाथपं नाम्नवर्णोसातिमोनाथः स्वा
मी असितस्य श्वेतस्य चंद्रः अतिरक्तस्य लोहितस्य भौमः हरितस्य शुकवर्णास
बुधः आपीतवर्णास्य हारिद्रस्य जीवः विचित्रस्य नानावर्णास्य शुक्रः मनोरमा
स्य चासितस्य कृष्णवर्णस्य सौरः प्रयोजनं बलवति ग्रहे हमनशाद्विद्यव

बृजा
टी
२२

22

णां तानं जन्मनि प्रश्नकाले वा यथोक्तद्रव्यलाभः ग्रहपूजायां तद्दानक्रमपूजा तथा
चयात्रवलाः वर्णा मंडलके षु चेति वक्ष्यमाणे सूर्यादिनाथाः स्मात्तवर्तेते सूर्या-
दीनां नाथाः सूर्यादिनाथाः आदित्यस्य वह्निर्वह्निर्नाथः स्वामी चंद्रमसः अंबुजलं सो
मस्याग्निजः कुमारः बुधस्य केशवो विष्णुः गुरोरिंद्रः शुक्रस्य शाची इन्द्राणी सौरस्य कः
प्रजापतिः प्रयोजनं ग्रहपूजायां ग्रहोक्तदेवता पूजनीया तथा च यवनेश्वरः देवा
ग्रहाणां जलवह्निविष्णुप्रजापतिस्कन्दमहेन्द्रदेव्यः चंद्रार्कवक्रार्कजभौमजीवशु
क्राश्च यथैव यजेत शाश्वत् तथा हीनामानयनेवलवद्ग्रहोक्तदेवतापर्यायनाम
तथा च यात्रायां ग्रहदेवतासंप्रजनादि भायावात् तथा च सारावल्यां नाम्रसित
हरितरक्तकपीतविचित्रा उनाद्दीनां पावकजलगुहकेशवशक्रशाचीवेधसः प
तयः पूर्वादि ग्रहदेवास्तन्मंत्रैः संपूजनामाशाम् कनकगजवाहनादीन्याप्नोति
गतोरितः शीघ्रं प्राणयात्रानादि प्रागाद्याः पूर्वा प्रथमा दिशः नासां सूर्यादयो ना
थाः तत्र पूर्वस्यां दिशि रविरादित्योधिपतिः पूर्वदक्षिणस्यां शुक्रः दक्षिणस्यां लो
हितांगारकः दक्षिणपश्चिमायां तमो राहुः पश्चिमायां सौरः शनैश्चरः पश्चिमोत्त

तथायामित्युग्रः उक्तस्यां विदुधः उक्तस्यैवं संग्रहे विहितमस्ति । प्रयोजनं केन्द्रस्थे ग्रहे स
ति काग्रहे दृष्टा वक्तव्यं तत्र नष्टादिषु बोधादिगमने दीयाणं इति दीयास्वासां विकं दी।
णेऽतः कृष्णाष्टम्यन्तर्धनाः शुक्लाष्टम्याद्यर्धयावत्क्षीणाः चन्द्र इति केचित् वयं पुनर्ब्रूमः
पक्षाष्टमर्धं तत्स्थितिर्यावदमावास्यान्ते सूर्यमण्डलार्धोत्तमः क्षीण इति तथा च यवने
श्वरः पापं न करोति विरक्ति तदा का मासेन शुक्लप्रतिपन्नष्टे नष्टे वेश शशी मध्यव
लो दशाहे श्रेष्ठो द्वितीये स्मवलस्तृतीये सौम्यत्वं दृष्टो बलवान्स एव तथा वक्तु
ग्रहार्कः कुजसूर्यजौ तत्पापौ शुभाः शुक्रशशांकजीवाः सौम्यत्वं सौम्या व्यतिमि
श्रितानेन सर्वत्र तत्त्वप्रकृतित्वमिति तस्मादेता वत्क्षीणा इति अर्के आदित्यः मा
हेशत्रैगारकः अर्कतनयः सौरः एते सदैव पापाः बुधस्तैर्युतः तेषामेकतमे
न युक्तः पाप एव शेषाः सौम्याः शुक्लप्रतिपत्प्रभृति कृष्णाष्टम्यर्धं यावच्चन्द्रः।
सौम्यः बुधः पापाविगुनः सौम्य एव जीवशुक्रौ सौम्यावितिसदैव प्रयोजनं पा
पसौम्यग्रहबलाज्ज्ञानं पापात्मकसौम्यस्वभावो भवति ॥ ५ ॥ अधुना ग्रहाणां प्र
कृतिविभागं महाभूताधिपत्वमाह पञ्चदशिकेनाह बुधसूर्ययमतानां शुभा।

बृ.जा.
टी.
२३

23

काव्यौ शशिशुक्रौ बुधजीवौ नराग्रहेशौ शिखिभूखपयोमरुद्गणानां वशिनो भूमिसु
तादयः क्रमेण बुध इत्ययं सुतो विनि बुधः ख्यातिः सूर्यसुतः शनिः एता नपुंसकाख्यौ
नपुंसकनामानौ शशी चन्द्रः शुक्रो भार्गवः एतौ युवती स्त्रीसंज्ञौ शेषा रविभौमा
जीवा नराः पुरुषसंज्ञाः प्रयोजनं जन्मनि चिन्तायां हृतनष्टादिभ्रुवलवं तः स्वपत
मेव कुर्वन्ति तेषामुपतापेन तदाश्रितानामुपतापः शिखिभूखपयोरुत्तमादि शि
खी तेजो नायकानां महाभूतानां पंचभूमिसुतादयः क्रमेण वशिनः तद्यथा शिखि
नोग्नेर्भूमिसुतो नायकः वशी भौमस्याग्निः स्वामी तदर्थः एवं भूमेर्बुधः खस्याका
शस्य जीवः पयसो बुधः शुक्रः मरुतो वायोः शनैश्चरः गणग्रहणमत्र रत्न एव
णार्थं तेनादित्यचन्द्रयोः कस्मान्नोक्तं मध्योच्यते तयोः स्वकमेवोक्तं वक्ष्यति
तावेव प्रसिद्धौ प्रयोजनं स्वदशायां महाभूतकृतां छायां व्यंजयंति वक्ष्यति छा
यां महाभूतकृतां चमर्वे स्तादि ॥ ६ ॥ अधुना ग्रहाणां ब्राह्मणादिकृतां चिपंसज्ञा
णां विभागं वा पञ्जातिकयाह विप्रादितः शुक्रगुरू कुजार्को शशी शशिजो बुधश्चान्त्यसि
तौ नवाणां चेद्धार्क जीवाजसितोकुजार्कीयथाक्रमे सत्वरजस्तमांसि विप्रा २३

द्विजोब्राह्मणास्तेषांवर्णानांचतुष्टयस्यस्वामिनोग्रहाअधिपतयः शुक्रोभार्गवः गुरुर्बृह
स्पतिः एतौब्राह्मणानामधिपती कुजोभौमः अर्कआदित्यः एतौक्षत्रियाणां शशी
चंद्रोवैश्यानां शूद्राणांबुधोसितःशनैश्चरः अंत्यजानांवर्णानांप्रतिलोमभवानांचं
डालमातंगधनिषधानां प्रयोजनं इत्थंनष्टादिशुबलाद्यधिकारादीनांग्रहोक्तवर्ण
प्रभावः एषामुपायानेनदृष्टव्यानिः तथाचसमः गुरुशुक्रौविप्रवरकौचन्द्रः सौ
म्यःशनैश्चरश्चेति विप्रक्षत्रियविट्शूद्रसंकरभवानांप्रभवितकराः अन्यजेयजयेच
नष्टेवाप्रीतिकरानोयार्थेनाशनेलाभे तथावलोक्यकः ऊर्ध्वमुखोगणानामेषांस्वपत्ना
ल्लात् चंद्रार्कजीवज्ञसाद् चन्द्रःशशीअर्कःआदित्यःजीवोबृहस्पतिः एतेसत्व
संज्ञाः सौम्योबुधःसितःशुक्रः एतौराजससंज्ञौ कुजोभौमः आर्किःशनैश्चरः एतौ
तामससंज्ञौएतेयथाक्रमंगुणाधिपतयोग्रहाः प्रयोजनंसत्वरजस्तमोवासित्रिंशां
शायस्मभास्करस्मात्दृगिति अन्येपुनर्ग्रहबलाद्वर्णयंति तथाचश्रीदेवकीर्त्तिः
बलवद्भिस्तद्गुणाभवन्तानरंति तत्राचार्यस्ययवनेस्वरणामतमत्तभेदः तेना
भौमःसात्विकउक्तः तथाचतद्वाक्यंसत्वाधिकाभास्करभौमजीवाअन्यतमा।

वृ॰ टी॰ २८

ज्ञेया तामसिकः शशीव शनैश्चरस्तामसिको ऽपि युक्तसंयोगेनान्यां लभते विशेषान् आचा
र्यस्य सत्यवचनमभिप्रेतं तथा च सत्वः तामसिकोऽकुजः सौरो राजसिको भार्गवः शशि
सुतश्च जीवः शशिभास्करौ सात्विका महाप्रकृतयो नृणां एवं यत्र यत्राचार्यस्य यवने
श्वरेण सह मतभेदस्तत्र तत्रास्य मतमिति अथ प्रथमाहितं सत्वं कुजः तच्चन्द्रा
र्कजीवाः पुनः किमित्युक्तं उच्यते इह गणावचनः सत्वशब्दः तत्र शौर्यपर्यायः यः का
र्याकार्यभटनानां सिंहादीनां मध्यस्थि येन सत्वा एकाकिनोऽपि वनवासिनः तथा च
एकाकिनि वनवासिन्यराजलक्षणपदवीनिशास्त्रे सत्वाद्धि ते मृगपतेर्नात्र जेनिनी
रःपरिणामेति अथ चतुर्णा सत्वं यः सात्विकस्तस्य द्वयास्थित्वं सप्तमांशेनव्राह्म
णादेव भक्तिः रजोधिकः काम्यकलाकुशली सततकविनः पुरुषोनिपुणः तमो
धिकोवंचयितापरेषांमूर्खोलसः क्रोधपरोतिनिद्र इति ७ अथ चक्रार्कयोः स्व
रूपेनोटकेनाह मधुपिंगलदृक्चतुरस्रतनुः पित्तप्रकृतिः सविनाल्पकचः तत्र
वृत्तनतुर्वेद्रवाकफः प्राज्ञश्च शशी मृदुवाक्शुभदृक् मधुपिंगलदृगिति मधु
पिंगलाक्षः सूर्यः संक्षेपकाचनतः चतुरस्रतनुः प्रमाविततभुजप्रमाणसमोच्छ्रायः २८

पित्तप्रकृतिः पित्ताधिकः सूक्ष्मकचो विरलकेशः एवंविधः सविता दिमः नवहन
नवविंमारि नवीचासो हन्ताचनवयं स्यासो नवहननवः कृशवन्तुलांगतवविस्मा
ङ्गः बहुवातकफः प्रसन्नमारुतश्लेष्मः प्रायो मेधावी मृदुवाक् कोमलाभाषी
शुभदृक् दर्शनीयात्मः एवंविधः शशी वेदः ५ अथांगारकबुधयोः स्वरूपमागत
यात्र क्रूरदृक् करुणमूर्तिरुदारः पैत्तिकः सचपलः कृशमध्यः स्निग्धवाक् तनतरा
स्वरुविशेषः पित्तमारुतकफप्रकृतिश्च क्रूरदृक् अंगारकः सचतरुणमूर्तिः नि
त्यैवावनापनाकारविग्रहः उदारोदाता पैत्तिकः पित्तबहुलः सचपलोनीवाङ्घ्रि
रचितः कृशमध्यस्तनूदरः एवंविधोंगारकः स्निग्धवाग्मिन्मारि स्निग्धवाग्मिमारि
स्निग्धवाग्मधुरभाषी मतनतरासरुचिः नित्यंपरिहासशीलः पित्तमारुतकफ
प्रकृतिः दोषत्रयोल्बणस्वभावः एवंविधो ज्ञो बुधः ६ जीवशुक्रयोः स्वरूपंवा
शास्यनात्र हृहतनवः पिंगलमूर्धजेक्षणो बृहस्पतिः श्रेष्ठमतिः कफात्मकः मे
गुः स्वधीकांतवपुः सुलोचनः कफानिलात्मा सितवक्रमूर्धजः हृहननवोरति
हृहननवः स्थूलशरीरः मूर्धजाः केशाः ईक्षणे नयने पिंगले कपिले यस्य कपि

लकेशः काचगात्रः इति श्रेष्ठमतिर्धर्मानुगतमनाः कफात्मकः श्लेष्मात्मा एवंविधो बृ
हस्पतिः भृगुविमाह सुखी निर्दुःखः कान्तवपुर्दर्शनीयशरीरः सुलोचनः शोभना
क्षः कफानिलात्मा श्लेष्ममारुतप्रकृतिः असितवक्रमूर्धजः असिताः कृष्णाः व
क्राः कुञ्चिताः मूर्धजाः केशा यस्य कृष्णकुञ्चितकेश इत्यर्थः एवंविधो भृगुः शुक्रः ।
अधुना शनैश्चरस्वरूपं धात्वादिस्वामिनश्च वसन्ततिलकेनाह मन्दोऽलसः कपिल
दृक् कृशदीर्घगात्रः स्थूलद्विजः परुषरोमकचोऽनिलात्मा स्नाय्वस्थ्यसृक्त्वग
थ शुक्रवसा च मज्जा मन्दार्कचन्द्रबुधशुक्रसुरेज्यभौमाः मन्द इति अलसः क्रिया
स्वपटुः कपिलदृक् काचनेत्रः कृशो दुर्बलो दीर्घमुन्नतं गात्रं यस्य दुर्बलो दीर्घदे
हः स्थूलद्विजः बृहद्दन्तः परुषरोमकचः बृहत्तनूरुहकेशः अनिलात्मा वात
प्रकृतिः एवंविधो मन्दः शनैश्चरः साध्यधातूनाह मन्दः शनिः स्नायुः अर्कः आदित्यः
अस्थि असृक् रुधिरं चन्द्रमाः त्वक् मनुष्यचर्म बुधः अथानन्तरं वीर्यं शुक्रो रेतः तद्वा
कः वसा मेदः सुरेज्यः गुरुः मज्जा भौमः अस्थ्यन्तर्गतो रसविशेषः स भौमः । उ
क्तप्रयोजनं लग्ने नवांशपतेस्तत्साधारणोपलक्षणेन जन्मकाले । २५

योबलवांस्तस्यैव तद्रूपस्तत्कालजो भवति यद्वा तस्यावस्था यस्मिन्काले स्यात्तं विचयात्त
